# माध्यमिक शिक्षा मण्डलं, मध्यप्रदेशः

## संस्कृत–पाठ्यक्रमः

## (हायर सेकण्डरी)

(सम्प्रेषण–उपागम आधारितः)

संस्कृत भाषायाः सस्कृतेः मूलकत्वात्, संस्काराणां शिक्षणत्वात्, भारतीयभाषाणां तासाम् साहित्यस्य उपजी–व्यत्वात्, भारतीय ज्ञान् विज्ञान् आधारभूत्वात् च महत्त्वं विद्यते।

पाठ्यक्रमे संस्कृतस्य अध्ययनं नितरां ज्ञानाय, सम्प्रेषणाय, संस्काराय च भवति इति बहुशः प्रमाणितम्। संस्कृतस्य ज्ञानेन् अध्ययनेन उच्चारणेन वाक्शुद्धिः चित्तशुद्धिः तु भवत्येव इतोप्यधिकतया विचारशुद्धिरपि भवति। अधुना संस्कृतस्य साहित्यं, भाषा विज्ञानं तत्र प्रतिपादितः सार्वकालिक–सार्वभौमिक सिद्धान्तः संसारे समादृता संस्कृताध्ययनस्य तात्पर्यं लोकोत्तरेण वैश्विकभावसंसारेण सह आत्मीय सम्बन्धः।

एतेन संस्कृतस्य महत्त्वंसिद्धयति। मध्यप्रदेशे माध्यमिक शिक्षायां संस्कृतस्य अध्ययनाय छात्राणां योग्यतानुरूपं पाठ्यक्रमस्य स्वरूपं निर्धारितमस्ति।

एषः पाठ्यक्रमः सम्भाषणपद्धत्या एव निर्मितः। संस्कृतस्य संस्कृतमाध्यमेन शिक्षणं एतस्य पाठ्यक्रमस्य वैशिष्ट्यम्। पाठ्यक्रमे छात्रेषु श्रवण–भाषण–लेखन–पठनावगमन–कौशलानां विकासार्थं बिन्दवः अत्र प्रस्तुताः।

पाठयक्रमः छात्राणां योग्यता–विस्ताराय उपयुक्तः, शासनस्य संस्कृत शिक्षण उद्देश्यपूरकः, आधुनिक युगानुरूपः अस्तीति।

### संस्कृत शिक्षणस्य उद्देश्यानि–

1. **ग्रहणशीलता–**

श्रवण–पठन–माध्ययेन संस्कृतभाषा संसारे सहजतया प्रवेशाय छात्राणां योग्यताविस्तारः एव ग्रहणशीलता इति। कक्षायां पाठ्यवस्तोः वाचनेन–अनुवाचनेन आदर्श वाचनेन च श्रवणस्य पठनस्य च दक्षता आयाति। संस्कृतस्य भाषिक–संरचना वैज्ञानिकी अस्ति। तत्र उच्चारणस्य शुद्धता अपरिहार्या भवति। शुद्धोच्चारणेन, मनसि संस्कारः जायते। तेन शुद्धं पाठनमपि भवति।

2. **अभिव्यक्तिः–**

(अ) मौखिकाभिव्यक्तिः

(ब) लिखिताभिव्यक्तिः

शुद्धोच्चारणेन श्रवणेन पठनेन, ग्रहणशीलतायाः छात्रेषु विकासः भवति। अनन्तरं लब्धबोधस्य विषयस्य संस्कारस्य वा लेखने संभाषणे अभिव्यक्तिः भवति। अभिव्यक्तेः मूले ग्रहणशीलतायाः प्रभावः कार्यं करोति। श्रवण पठनयोः परिष्कारेण अभिव्यक्तिरपि उपयुक्ता भवति, पूर्णाभवति, विशुद्धा भवति, विषयानुरूपा च भवति।

अत्र द्वितीयक्रमे छात्राणां भाषणस्य परिष्कारः लेखनस्य परिष्कारः अपि जायते। श्रवणपठनयोः परिष्कारेण एव अभिव्यक्तेरपि परिष्कारः सुनिश्चितो भवति।

3. **अभिवृत्तौ परिवर्तनम्–**

तृतीयक्रमे अभिवृत्तेः स्थानम्। ग्रहणशीलतायाः अनन्तरं यदा अभिव्यक्तिः परिष्कृता भवति तदा विषयस्य अवबोधेन, नीति–धर्म–आदर्श–त्याग–परोपकारादि भावपरिचयेन, महापुरुषाणां कृतित्वेन व्यक्तित्वेन च छात्राणां अभिवृत्तौ परिवर्तनानि भवन्ति।

एतानि परिवर्तनानि अधोलिखितानि–

- – जीवनमूल्यकेन्द्रितानि।
- – सामाजिकसमरसताबोधकानि।
- – राष्ट्रियभावनापूरितानि।
- – सांस्कृतिकगौरवमोदितानि।
- – महापुरूषाणां आदर्शप्रेरितानि।

4. **सृजनशीलता –**

चर्तुथक्रमे सृजनशीलतायाः विकासः अपेक्षितः भवति। वस्तुतः पाठ्यक्रमस्य साफल्यं सृजनशीलतायां एव सिद्धयति। यदि पाठयक्रमेण छात्रेषु सकारात्मक विचाराः, उद्दात्ताः भावाः, परिवार–समाज–राष्ट्रपरक सार्थक विचाराः न जागरिताः तदा पाठ्यक्रमस्य उद्देश्यं निरर्थकं भवति।

अत्र ग्रहणशीलतायाः सार्थकतायां अभिव्यक्तेः साफल्यं, अभिव्यक्तेः पूर्णतायां अभिवृत्तौ सार्थकं परिवर्तनं तथा च सार्थकेन अभिवृत्तौ परिवर्तनेन एव सृजनशीलतायाः छात्रेषु विकासः भवति, मौलिकतायाः स्फुरणं भवति। सृजनशीलतायाः बिन्दवः –

- – मौलिक–रचनात्मक–विकासः।
- – सम्भाषणमाध्यमेन संवादक्षमता–विकासः।
- – संस्कृतवाक्यरचना–कौशलम्।
- – संस्कृतेन भावार्थ–प्रबोधनम् ।
- – निबन्धलेखनम्।
- – मौलिककथा–पत्रादि निबन्धनम्।

एतेन ग्रहणशीलता–अभिव्यक्ति–अभिवृत्ति–सृजनशीलता सोपानचतुष्टयेन संस्कृतशिक्षणस्य उद्देश्यं सार्थकं पूर्णं च भवितुं अर्हति। एतेन संस्कृतसम्भाषणमाध्यमेन संस्कृतभाषा एवं साहित्य–शिक्षणेन छात्राः संस्कारिताः संस्कृतिपरायणाः, श्रेष्ठाः नागरिकाः भविष्यन्ति इति आशास्महे।

# संस्कृत सामान्य
# कक्षा – एकादशी

पाठ्यवस्तु

अंक विभाजन = 100

| | | | | | |
|---|---|---|---|---|---|
| गद्य | – | 10 | शब्दरूप | – | 3 |
| पद्य | – | 10 | धातुरूप | – | 3 |
| प्रश्नोत्तर | – | 5 | सन्धि | – | 3 |
| लघुत्तरीय | – | 5 | समास | – | 4 |
| एकपदेन | – | 5 | अव्यय | – | 4 |
| रिक्त स्थान | – | 5 | शुद्धाशुद्ध | – | 3 |
| जोड़िया | – | 5 | प्रत्यय | – | 6 |
| अपठित | – | 10 | पत्र | – | 4 |
| सुभाषित | – | 5 | निबन्ध | – | 10 |
| योग | – | 60 | योग | – | 40 |

160

पुनरावृत्ति + 20

नोट :– उपरोक्त पाठ्य वस्तु के लिए कालखण्ड – 180

## संस्कृतम् सामान्यम्
## कक्षा – एकादशी

1. वर्णानाम् उच्चारण स्थानम्

   आ वर्तनी–वर्णवियोजनम्, वर्ण–संयोजनम्

2. सन्धि – पाठ्य–पुस्तके प्रयुक्तपदानां संधि–विच्छेदः, सन्धिकरणम्।
   स्वर–सन्धि– दीर्घ, गुण, वृद्धि, यण्, अयादिः, प्रकृतिभावः
   व्यञ्जन सन्धि – श्चुत्व, ष्टुत्व, जश्त्व, षत्व, णत्वविधानम्, अनुस्वारः, परसवर्णः।
   विसर्ग सन्धि – सत्व, उत्व, कत्व, लोपः विसर्ग स्थाने स्, श् , ष्

3. शब्दरूपाणि – वाक्येषु सविभक्तिकप्रयोग :
   (क) अजन्ताः – बालक, फल, रमा, कवि, पति, मति, वारि, नदी, शिशु, धेनु, मधु, वधू, पितृ, मातृ, कर्तृ एवं समानान्तर शब्दाः।
   (ख) हलन्ताः – राजन्, गच्छत्, भवत्, आत्मन्, विद्वस्, चन्द्रमस्, वाच् एवं समानान्तर प्रयोगाः
   (ग) सर्वनामानि – सर्व, यत्, तत्, किम्, इदम् (त्रिषु लिङ्गेषु)
   अस्मद्, युष्मद्।
   (घ) संख्यावाचकशब्दाः – एक संख्यातः दशसंख्यापर्यन्तम् त्रिषु लिङ्गेषु

4. धातुरूपाणि – लट्, लृट्, लोट्, लङ् विधिलिङ् इति पञ्च–लकारेषु अधोलिखित धातुनां। समानार्थक धातुनां वाक्येषु प्रयोगः।
   (क) परस्मैपदिनः – भू, पठ्, गम्, लिख्, पा, स्था, दृश्, अस्, कथ्, भक्ष्, घ्रा, क्रुध, हन्, श्रु, नृत्, स्पृश्, चुर्, कथ्।
   (ख) आत्मनेपदिन : – लभ्, सेव्, मुद्, याच्,
   (ग) उभयपदिनः – कृ, हृ, क्री, ज्ञा, ग्रह, शक्

5. कारक – उपपदविभक्तिप्रयोगः

6. सामान्य – वाच्य परिवर्तनम् (लट्लकारे)

7. अव्यय – पुनः, उच्चैः, नीचैः, शनैः, अधः, चिरम्, पुरा, मुहुः, ह्यः, श्वः, अद्य, अधुना, कुत्र, यत्र, तत्र, सर्वत्र, यदा, कदा, सर्वदा, उपरि, मा, यथा, तथा, अपि, विना, सह, अधि, प्रति,

8. पठित–सामग्री–अवबोधनम्,
   1. (अ) अंश–द्वयम्–एक–गंद्याशः/पद्यांशः तथा एक–नाट्यांशः/पाठ्यांश–आधारितं प्रश्न–वैविध्यम् एक पदेन उत्तरम्
   पूर्णवाक्येन उत्तरम्/ विशेषण–विशेष्य अन्वितिः/पर्याय/विलोम–चयनम्, सर्वनामस्थाने संज्ञाप्रयोगः।
   2. सूचीसहाय्येन प्रदत्तपद्यांशे रिक्तस्थानपूर्तिः।
   3. उंद्धृतश्लोकानां, प्रसंङ्गसन्दर्भे लेखनम्, कः, कम्, कथयति। सन्दर्भः ग्रन्थस्य लेखकस्य च नामोल्लेखः

4. दत्तेषु भावार्थगद्येषु शुद्धभावार्थचयनम्
5. उद्धृतश्लोकानाम्/प्रदत्तेषु अन्वयेषु रिक्तस्थानपूर्तिः
6. प्रदत्त वाक्यांशानां सार्थकं संयोजनम्
7. प्रदत्त–पंक्तिषु प्रसंङ्गानुसारं श्लिष्टपदानां/पदानां अर्थलेखनम्।

**9. संस्कृत साहित्य–परिचयः–**

(1) संस्कृतेन वस्तुनिष्ठ/अतिलघूत्तर/प्रश्नमाध्यमेन अधोलिखित संस्कृत साहित्य–विषयकं परीक्षणम् संस्कृतशब्दस्थ व्युत्पतिः परिभाषा च।
वेदः, उपनिषद्, पुराणम्, स्मृतिः, रामायणम्, महाभारतम्।
गद्य–काव्यम्, पद्य–काव्यम्, चम्पू–काव्यम्, नाटकम्, प्रमुख–नाट्य–तत्त्वानां प्रदत्त–परिभाषासु, शुद्धपरिभाषाचयनम् स्वतन्त्रताआन्दोलनस्यनेतृणां, महापुरूषाणां, सतां, विषये ज्ञानम्।

**10. रचनात्मक कार्यम्–**

i) अनौपचारिकं पत्रम्/ प्रार्थनापत्रम्
ii) लघुकथा (शब्द–सूची–साहाय्येन रिक्तस्थानपूर्तिमाध्यमेन)
वार्तालापे एकपक्षपूरणम्
iii) चित्रमधिकृत्य निर्दिष्ट शब्दसूची साहाय्येन
(संकेताधारितम् अनुच्छेद लेखनम्)

निर्धारित पाठ्यपुस्तक - **"अपूर्वा"**
निर्माण एवं संकलन मध्यप्रदेश राज्य शिक्षा केन्द्र भोपाल
प्रकाशक मध्यप्रदेश पाठ्यपुस्तक निगम भोपाल